# Ramarahasyopanishat Savyakhya

# રામરહસ્યોપનિષત્ સવ્યાખ્યા

## Document Information

Text title : Ramarahasya Upanishad with Commentary by Upanishadbrahmayogin

File name : rAmarahasyopaniShatsavyAkhyA.itx

Category : upanishhat, raama, upaniShat, rAma, atharvaveda, vyAkhyA

Location : doc_upanishhat

Author : Vedic tradition

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description-comments : 54 / 108; Atharva Veda - Vaishnava upanishad

Latest update : October 30, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 30, 2025

*sanskritdocuments.org*

# રામરહસ્યોપનિષત્ સવ્યાખ્યા

ૐ ભદ્રં કર્ણેભિઃ શ્રુણુયામ દેવાઃ । ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાંસસ્તનૂભિર્વ્યશેમ દેવહિતં યદાયુઃ ।
સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ । સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ । સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

## પ્રથમોઽધ્યાયઃ

રામસ્ય બ્રહ્મતારકત્વં
સનકાદ્યા યોગિવર્યા અન્યે ચ ઋષયસ્તથા ।
પ્રહ્લાદાદ્યા વિષ્ણુભક્તા હનૂમન્તમથાબ્રુવન્ ॥ ૧॥

વાયુપુત્ર મહાબાહો કિં તત્ત્વં બ્રહ્મવાદિનામ્ ।
પુરાણેષ્વષ્ટાદશસુ સ્મૃતિષ્વષ્ટાદશસ્વપિ ॥ ૨॥

ચતુર્વેદેષુ શાસ્ત્રેષુ વિદ્યાસ્વાધ્યાત્મિકેઽપિ ચ ।
સર્વેષુ વિષ્ણ્વભિધાનેષુ વિઘ્નસૂર્યેશશક્તિષુ ॥ ૩॥

એતેષુ મધ્યે કિં તત્ત્વં કથય ત્વં મહાબલ ॥ ૪॥

હનૂમાન્ હોવાચ-
ભો યોગીન્દ્રાશ્ચ ઋષયો વિષ્ણુભક્તાસ્તથૈવ ચ ।
શ ૃણુધ્વં મામકીં વાચં ભવબન્ધવિનાશિનીમ્ ॥ ૫॥

એતેષુ ચૈવ સર્વેષુ તત્ત્વં ચ બ્રહ્મ તારકમ્ ।
રામ એવ પરં બ્રહ્મ રામ એવ પરં તપઃ ।
રામ એવ પરં તત્ત્વં શ્રીરામો બ્રહ્મ તારકમ્ ॥ ૬॥

કૈવલ્યશ્રીસ્વરૂપેણ રાજમાનં મહોઽવ્યયમ્ ।

પ્રતિયોગિવિનિર્મુક્તં શ્રીરામપદમાશ્રયે ॥

ઇહ સ્વલુ અથર્વણપ્રવિભક્તેયં શ્રીરામરહસ્યોપનિષત્ શ્રીરામમન્ત્રયન્ત્રસાધનપ્રપઞ્ચનપૂર્વકં શ્રીરામતત્ત્વપર્યવસન્ના વિજયતે । અસ્યાઃ સઙ્ક્ષેપતો વિવરણમારભ્યતે । સનકાદિમુનિવૃન્દપ્રહ્લાદાદિભાગવતકદમ્બપવનાત્મજપ્રશ્ન વિધાસ્તુત્યર્થા, જાતમાત્રેણ વિદિતતત્ત્વૈઃ સનકપ્રહ્લાદાદિભિરપિ ઇયં પૃષ્ટા પરમશિવાવતારપવનાત્મજેન પ્રોક્તેતિ । આખ્યાયિકામવતારયતિ-સનકાદ્યા ઇતિ ॥ ૧॥ કિમિતિ? વાયુપુત્રેતિ । વાયુપુત્રેત્યાદિપ્રશ્નતો હનૂમતઃ સર્વવિત્ત્વમવગમ્યતે ॥ ૨-૪॥

તત્કૃતપ્રશ્નોત્તરં હનૂમાન્ હોવાચ । કિમિતિ? ભો ઇતિ । ભવબન્ધવિનાશિનીમ્-સ્વાજ્ઞલોકસ્ય, ભવતાં કૃતાર્થત્વાત્ ॥ ૫॥ સર્વેષુ વિષ્ણ્વભિધાનેષુ વિઘ્નસૂર્યેશશક્તિભેદેષુ એતેષુ વેદશાસ્ત્રપુરાણાદિષુ અર્થતો વિચારિતેષુ સત્સુ અથ સ્વાતિરિક્તકલનાઽપહ્નવસિદ્ધં યદ્બ્રહ્મમાત્રં નિષ્પ્રતિયોગિકમવશિષ્યતે તદેવાયમિત્યાહ-રામ એવેતિ । સ્વાતિરિક્તકલનાઽસમ્ભવપ્રબોધસિદ્ધનિષ્પ્રતિયોગિકબ્રહ્મમાત્રતયા રાજતે મહીયતે ઇતિ રામ એવ પરં ઉત્કૃષ્ટં બ્રહ્મ સ્વમાત્રતયા સદોપબૃંહણાત્, રામ એવ પરં ઉત્કૃષ્ટં તપઃ તન્માત્રજ્ઞાનમિત્યર્થઃ । રામ એવ પરં તત્ત્વં સ્વયાથાત્મ્યં સ્વયમેવેત્યર્થઃ । પ્રત્યગભિન્નબ્રહ્મરૂપેણ શ્રીરામો બ્રહ્મ તારકં ભ્રૂમધ્યતારકયોગલક્ષિતત્વાત્ । યદ્વા-શ્રીરામસ્ય બ્રહ્મતારકલક્ષ્યતુર્યતુરીયરૂપત્વાત્ બ્રહ્મતપસ્તત્ત્વતારકબોધ્યં રામાખ્યં બ્રહ્મૈવ સ્વાજ્ઞાદિદૃષ્ટિમોહે સત્યસતિ નિષ્પ્રતિયોગિકં સ્વમાત્રમવશિષ્યત ઇત્યર્થઃ ॥ ૬॥

રામસ્ય અઙ્ગાનિ વાયુપુત્રાદીનિ

વાયુપુત્રેણોક્તાસ્તે યોગીન્દ્રા ઋષયો વિષ્ણુભક્તા હનૂમન્તં પપ્રચ્છુઃ-રામસ્યાઙ્ગાનિ નો બ્રૂહીતિ ॥ ૭॥

હનૂમાન્ હોવાચ-વાયુપુત્રં વિઘ્નેશં વાણીં દુર્ગાં ક્ષેત્રપાલકં સૂર્યં ચન્દ્રં નારાયણં નારસિંહં વાસુદેવં વારાહં તત્સર્વાન્ મન્ત્રાન્ સીતાં લક્ષ્મણં શત્રુઘ્નં ભરતં વિભીષણં સુગ્રીવમઙ્ગદં જામ્બવન્તં પ્રણવમેતાન્ રામસ્યાઙ્ગાનિ જાનીથાઃ । તાન્યઙ્ગાનિ વિના રામો વિઘ્નકરો ભવતિ ॥ ૮॥

એવં વાયુપુત્રાત્ નિર્વિશેષબ્રહ્મતત્ત્વમવગમ્ય મુનયો હૃષ્ટાઃ સન્તઃ સ્વાજ્ઞલોકાનુકમ્પયા નિર્વિશેષબ્રહ્માપ્ત્યુપાયસવિશેષં બ્રહ્મ તદઙ્ગાનિ ચ પૃચ્છન્તીત્યાહ-વાયુપુત્રેણેતિ । પપ્રચ્છુઃ-કિમિતિ? રામસ્યેતિ ।

પરિત્રાણાય સાધૂનાં વિનાશાય ચ દુષ્કૃતામ્ ।
ધર્મસંસ્થાપનાર્થાય સમ્ભવામિ યુગે યુગે ॥

ઇતિ સ્વપ્રતિજ્ઞાપાલનાય કર્મજ્ઞાનયોગલક્ષણનિષ્ઠાદ્વયપરિપાલકનારાયણરૂપેણ રાજતે મહીયતે ઇતિ રામો દાશરથિઃ સ્વેતરદુર્લભસૂનૃતભાષણતયા યઃ પુરા આસામાસ તસ્ય કાનિ અઙ્ગાનિ તદ્ગોચરમન્ત્રાશ્ચ કે તત્ સર્વં નો બ્રૂહિ ઇતિ ॥ ૭॥ તૈઃ પૃષ્ટો હનૂમાન્ હોવાચ । તાનિ કાનિ ઇત્યત્ર તદાહ-વાયુપુત્રમિતિ । વાયુપુત્રાદિજામ્બવદન્તાઙ્ગદેવતામન્ત્રાન્ ત્રેધા અષ્ટધા ષોડશધા વા આદૌ જપ્ત્વા તતો રામમન્ત્રજપઃ કાર્યઃ । એવં કૃતે ભગવાન્ રામઃ પ્રસન્નો ભવતીત્યર્થઃ ॥ ૮॥

ગૃહસ્થાનાં રામાઙ્ગપ્રણવાધિકારઃ

પુનર્વાયુપુત્રેણોક્તાસ્તે હનૂમન્તં પપ્રચ્છુઃ-આઞ્જનેય મહાબલ વિપ્રાણાં ગૃહસ્થાનાં પ્રણવાધિકારઃ કથં સ્યાદિતિ ॥ ૯॥

સ હોવાચ-શ્રીરામ એવોવાચેતિ । યેષામેષ ષડક્ષરાધિકારો વર્તતે તેષાં પ્રણવાધિકારઃ સ્યાન્નાન્યેષામ્ । કેવલમકારોકારમકારાર્ધમાત્રાસહિતં પ્રણવમૂહ્ય યો રામમન્ત્રં જપતિ તસ્ય શુભકરોઽહં સ્યામ્ । તસ્ય પ્રણવસ્યાકારસ્યોકારસ્ય મકારસ્યાર્ધમાત્રાયાશ્ચ ઋષિશ્છન્દો દેવતા તત્તદ્વર્ણાવર્ણાવસ્થાનં સ્વરવેદાગ્નિગુણાનુચ્ચાર્યાન્વહં પ્રણવં મન્ત્રાદ્દ્વિગુણં જપ્ત્વા પશ્ચાદ્રામમન્ત્રં યો જપેત્ સ રામો ભવતીતિ રામેણોક્તાસ્તસ્માદ્રામાઙ્ગં પ્રણવઃ કથિત ઇતિ ॥ ૧૦॥

પ્રણવસ્યાપિ રામાઙ્ગત્વે પરિવ્રાજકેતરાણાં પ્રણવાધિકારઃ કથમિતિ પૃચ્છન્તીત્યાહ-પુનરિતિ ॥ ૯॥ તૈઃ પૃષ્ટો હનૂમાન્ સ્વાત્માનં પ્રતિ શ્રીરામચન્દ્રેણ યદુક્તં તદેવાહ-સ હોવાચેતિ । શ્રીરામ એવોવાચેતિ-કિમિતિ? યેષામિતિ । બ્રહ્મચારી ગૃહી વાનપ્રસ્થઃ ઇત્યેતેષાં કેવલપ્રાધાન્યેન પ્રણવજપાધિકારોનાસ્ત્યેવ, ષડક્ષરાદિમન્ત્રાઙ્ગત્વેન તજ્જપાધિકારોઽસ્તીત્યાહ-કેવલમિતિ । પ્રણવમૂહ્ય ચતુર્માત્રાકાલમુચ્ચાર્ય । આદ્યન્તપ્રણવયોજનપૂર્વકં રામમન્ત્રજાપકાનાં શ્રીરામપદપ્રાપ્ત્યુપાયશુભપ્રાપકો હનૂમાન્ અહં સ્યાં ઇત્યર્થઃ । યો યદિ શ્રીરામભાવાપત્તિં વાઞ્છતિ તદાઽયં ષડક્ષરજપાત્ પૂર્વમેવ તસ્ય પ્રણવસ્યેત્યાદિ । યસ્માદેવં તસ્માત્ ॥ ૧૦॥

રામનામજપેન સર્વપાપનિવૃત્તિઃ

વિભીષણ ઉવાચ-

સિંહાસને સમાસીનં રામં પૌલસ્ત્યસૂદનમ્ ।
પ્રણમ્ય દણ્ડવદ્ભૂમૌ પૌલસ્ત્યો વાક્યમબ્રવીત્ ॥ ૧૧॥

રઘુનાથ મહાબાહો કેવલં કથિતં ત્વયા ।
અઙ્ગાનાં સુલભં ચૈવ કથનીયં ચ સૌલભમ્ ॥ ૧૨॥

શ્રીરામ ઉવાચ-અથ પઞ્ચ દણ્ડકાનિ પિતૃઘ્નો માતૃઘ્નો બ્રહ્મઘ્નો ગુરુહનનઃ કોટિયતિઘ્નોઽનેકકૃતપાપો યો મમ ષણ્ણવતિકોટિનામાનિ જપતિ તેભ્યઃ પાપેભ્યઃ પ્રમુચ્યતે । સ્વયમેવ સચ્ચિદાનન્દસ્વરૂપો ભવેન્ન કિમ્ ॥ ૧૩॥

કદાચિત્ રામં સર્વભૂતહિતકૃત્ વિભીષણ ઉવાચ । કિમિતિ? સિંહાસન ઇતિ ॥ ૧૧-૧૨॥ અપાપિનાં સ્વમન્ત્રતદઙ્ગપ્રણવાનુષ્ઠાનતઃ કેવલં ત્વદાપ્તિરભિહિતા । બ્રહ્મહત્યાદિપાતકિનાં સ્વાપ્ત્યુપાયઃ કથં? ઇત્યાશઙ્કમાનમાલક્ષ્ય વિભીષણં પ્રતિ શ્રીરામ ઉવાચ । કિમિતિ? અથેતિ । કાનિ તાનીત્યત્ર-પિતૃઘ્ન ઇત્યાદિ । પિત્રાદિયત્યન્તહનનપાતકૈઃ નરો દણ્ડ્યતે, તાનિ પઞ્ચ દણ્ડકાનિ । યદિ તચ્છમનાર્થી પુરુષઃ તદા રામ રામેતિ ષણ્ણવતિકોટિનામજપતો નિષ્પાપો ભૂત્વા મદ્ભાવમેતીત્યત્ર ન હિ સંશયોઽસ્તીત્યર્થઃ ॥ ૧૩॥

રામોપનિષદાદિભિરપિ સર્વપાપશાન્તિઃ

પુનરુવાચ વિભીષણઃ-તત્રાપ્યશક્તોઽયં કિં કરોતિ ॥ ૧૪॥

સ હોવાચેમમ્-કેકસેય પુરશ્ચરણવિધાવશક્તો યો મમોપનિષદં મમ ગીતાં મન્નામસહસ્રં મદ્વિશ્વરૂપં મદષ્ટોત્તરશતં રામશતાભિધાનં નારદોક્તસ્તવરાજં હનૂમત્પ્રોક્તં મન્ત્રરાજાત્મકસ્તવં સીતાસ્તવં ચ રામષડક્ષરીત્યાદિભિર્મન્ત્રૈર્યો માં નિત્યં સ્તૌતિ મત્સદૃશો ભવેન્ન કિં ભવેન્ન કિમ્ ॥ ૧૫॥

સુલભોપાયબુભુત્સયા પુનરુવાચ ॥ ૧૪॥ અનેનાપિ પારાયણેન પઞ્ચદણ્ડકશાન્તિદ્વારા મદ્ભાવમેતીત્યત્ર ન હિ સંશયોઽસ્તિ । આવૃત્તિઃ અવધારણાર્થા પ્રથમાધ્યાય સમાપ્ત્યર્થા વા ઇતિ ॥ ૧૫॥

ઇતિ પ્રથમોઽધ્યાયઃ ।

## દ્વિતીયોઽધ્યાયઃ

એકાક્ષરરામમન્ત્રઃ

સનકાદ્યા મુનયો હનૂમન્તં પપ્રચ્છુઃ-આઞ્જનેય મહાબલ તારકબ્રહ્મણો રામચન્દ્રસ્ય મન્ત્રગ્રામં નો બ્રૂહીતિ ॥

હનૂમાન્ હોવાચ-

વહ્નિસ્થં શયનં વિષ્ણોરર્ધચન્દ્રવિભૂષિતમ્ ।
એકાક્ષરો મનુઃ પ્રોક્તો મન્ત્રરાજઃ સુરદ્રુમઃ ॥ ૧॥

બ્રહ્મા મુનિઃ સ્યાદ્ગાયત્રં છન્દો રામોઽસ્ય દેવતા ।
દીર્ઘાર્ધેન્દુયુજાઽઙ્ગાનિ કુર્યાદ્વહ્ન્યાત્મનો મનોઃ ॥ ૨॥

બીજશક્ત્યાદિબીજેન ઇષ્ટાર્થે વિનિયોજયેત્ ।
સરયૂતીરમન્દારવેદિકાપઙ્કજાસને ॥ ૩॥

શ્યામં વીરાસનાસીનં જ્ઞાનમુદ્રોપશોભિતમ્ ।
વામોરુન્યસ્તતદ્ધસ્તં સીતાલક્ષ્મણસંયુતમ્ ॥ ૪॥

અવેક્ષમાણમાત્માનમાત્મન્યમિતતેજસમ્ ।
શુદ્ધસ્ફટિકસઙ્કાશં કેવલં મોક્ષકાઙ્ક્ષયા ॥ ૫॥

ચિન્તયન્ પરમાત્માનં ભાનુલક્ષં જપેન્મનુમ્ ।

એકાક્ષરાદિશ્રીરામમન્ત્રગ્રામબુભુત્સયા મુનયો હનૂમન્તં પૃચ્છન્તીત્યાહ-સનકાદ્યા ઇતિ । કિમિતિ? આઞ્જનેયેતિ । તૈરેવં પૃષ્ટો હનૂમાન્ એકાક્ષરાદિદ્વાત્રિંશદક્ષરાન્તમન્ત્રતદવાન્તર ભેદાન્ તદઙ્ગગાયત્રીમાલામન્ત્રાન્ ક્રમેણ હોવાચ । આદાવેકાક્ષરમનુમુદ્ધરતિ-વહ્નિસ્થમિતિ । સ્વાભિધેયે વહ્નૌ તદભિધાનતયા તિષ્ઠતીતિ વહ્નિસ્થં હ્રસ્વરેફાક્ષરં રેતિ, વિષ્ણોઃ શયનમિતિ દીર્ઘમાત્રોચ્યતે શેષસ્ય દીર્ઘાઙ્ગત્વાત્, અર્ધેન્દુશબ્દેન બિન્દુઃ, આહત્ય રામિતિ ॥ ૧॥ તસ્ય ઋષ્યાદિકમાહ-બ્રહ્મેતિ । રેફદીર્ઘાર્ધેન્દુયુજા રામિત્યાદિના કરાઙ્ગન્યાસૌ કુર્યાદિત્યર્થઃ ॥ ૨॥ ધ્યાનં તુ-સરયૂતીરેતિ ॥ ૩-૫॥

દ્વિત્રિચતુરક્ષરમન્ત્રાઃ
વહ્નિર્નારાયણેનાઢ્યો જાઠરઃ કેવલોઽપિ ચ ॥ ૬॥

દ્વ્યક્ષરો મન્ત્રરાજોઽયં સર્વાભીષ્ટપ્રદસ્તતઃ ।
એકાક્ષરોક્તમૃષ્યાદિ સ્યાદાદ્યેન ષડઙ્ગકમ્ ॥ ૭॥

તારમાયારમાઽનઙ્ગવાક્સ્વબીજૈશ્ચ ષડ્વિધઃ ।
ત્ર્યક્ષરો મન્ત્રરાજઃ સ્યાત્ સર્વાભીષ્ટફલપ્રદઃ ॥ ૮॥

દ્વ્યક્ષરશ્ચન્દ્રભદ્રાન્તો દ્વિવિધશ્ચતુરક્ષરઃ ।
ઋષ્યાદિ પૂર્વવજ્જ્ઞેયમેતયોશ્ચ વિચક્ષણૈઃ ॥ ૯॥

રામદ્વ્યક્ષરમુદ્ધરતિ-વહ્નિરિતિ । રેફો વહ્નિઃ, નારાયણેનાકારેણ યોનિતશ્ચેત્ રા ઇતિ, જાઠરો મકારઃ કેવલોઽપિ ચ હ્રસ્વમકારયોજનાત્ રામેતિ દ્વ્યક્ષરો ભવતિ ॥ ૬-૭॥ ષટ્કારતઃ ત્ર્યક્ષરમુદ્ધરતિ-તારેતિ । ૐ રામ, હ્રીં રામ, શ્રીં રામ, ક્લીં રામ, ઐં રામ, રાં રામ, ઇતિ ષડ્વિધઃ । ઋષ્યાદિકં એકાક્ષરવત્ જ્ઞેયમિત્યર્થઃ ॥ ૮॥ દ્વિધા ચતુરક્ષરમુદ્ધરતિ-દ્વ્યક્ષર ઇતિ । રામચન્દ્ર રામભદ્રેતિ દ્વિપ્રકારઃ ચતુરક્ષરઃ ॥ ૯॥

પઞ્ચાક્ષરમન્ત્રઃ
સપ્રતિષ્ઠૌ રમૌ વાયૂ હૃત્પઞ્ચાર્ણો મનુર્મતઃ ।
વિશ્વામિત્રઋષિઃ પ્રોક્તઃ પઙ્ક્તિશ્છન્દોઽસ્ય દેવતા ॥ ૧૦॥

રામભદ્રો બીજશક્તિપ્રથમાર્ણનતિ ક્રમાત્ ।
ભ્રૂમધ્યે હૃદિ નાભ્યૂર્વોઃ પાદયોર્વિન્યસેન્મનુમ્ ॥ ૧૧॥

ષડઙ્ગં પૂર્વવદ્વિદ્વાન્ મન્ત્રાર્ણૈર્મનુનાસ્ત્રકમ્ ।
મધ્યે વનં કલ્પતરોર્મૂલે પુષ્પલતાસને ॥ ૧૨॥

લક્ષ્મણેન પ્રગુણિતમક્ષ્ણઃ કોણેન સાયકમ્ ।
અવેક્ષમાણં જાનક્યા કૃતવ્યજનમીશ્વરમ્ ॥ ૧૩॥

જટાભારલસચ્છીર્ષં શ્યામં મુનિગણાવૃતમ્ ।
લક્ષ્મણેન ધૃતચ્છત્રમથવા પુષ્પકોપરિ ॥ ૧૪॥

દશાસ્યમથનં શાન્તં સસુગ્રીવવિભીષણમ્ ।
એવં લબ્ધ્વા જયાર્થી તુ વર્ણલક્ષં જપેન્મનુમ્ ॥ ૧૫॥

એકધા પઞ્ચાક્ષરમુદ્ધરતિ-સપ્રતિષ્ઠાવિતિ । ઇકારદીર્ઘબિન્દુભ્યાં સહ પ્રતિષ્ઠિતાવિતિ સપ્રતિષ્ઠૌ શ્રીં શ્રીં યં નમઃ ઇતિ પઞ્ચાક્ષરો મનુઃ ॥ ૧૦॥ બીજશક્તિપ્રથમાર્ણનતિક્રમાત્ રાં નમ ઇત્યાદિ । ન્યાસસ્તુ-ભ્રૂમધ્યેતિ ॥ ૧૧-૧૨॥ અક્ષ્ણઃ કોણેન અપાઙ્ગેન લક્ષ્મણેન સાયકં ધનુષિ પ્રગુણિતં અવેક્ષમાણમિતિ ॥ ૧૩-૧૫॥

ષડક્ષરમન્ત્રઃ

સ્વકામશક્તિવાગ્લક્ષ્મીતારાદ્યાઃ પઞ્ચવર્ણકાઃ ।
ષડક્ષરઃ ષડ્વિધઃ સ્યાચ્ચતુર્વર્ગફલપ્રદઃ ॥ ૧૬॥

પઞ્ચાશન્માતૃકામન્ત્રવર્ણપ્રત્યેકપૂર્વકમ્ ।
લક્ષ્મીવાઙ્મન્મથાદિશ્ચ તારાદિઃ સ્યાદનેકધા ॥ ૧૭॥

શ્રીમાયામન્મથૈકૈકં બીજાદ્યન્તગતો મનુઃ ।
ચતુર્વર્ણઃ સ એવ સ્યાત્ ષડ્વર્ણો વાઞ્છિતપ્રદઃ ॥ ૧૮॥

સ્વાહાઽન્તો હુમ્ફડન્તો વા નત્યન્તો વા ભવેદયમ્ ।
અષ્ટાવિંશત્યુત્તરશતભેદઃ ષડ્વર્ણ ઈરિતઃ ॥ ૧૯॥

બ્રહ્મા સમ્મોહનઃ શક્તિર્દક્ષિણામૂર્ત્તિરેવ ચ ।
અગસ્ત્યશ્ચ શિવઃ પ્રોક્તા મુનયોઽનુક્રમાદિમે ॥ ૨૦॥

છન્દો ગાયત્રસંજ્ઞં ચ શ્રીરામશ્ચૈવ દેવતા ।
અથવા કામબીજાદેર્વિશ્વામિત્રો મુનિર્મનોઃ ॥ ૨૧॥

છન્દો દેવ્યાદિગાયત્રી રામભદ્રોઽસ્ય દેવતા ।
બીજશક્તી યથાપૂર્વં ષડ્વર્ણાન્ વિન્યસેત્ ક્રમાત્ ॥ ૨૨॥

બ્રહ્મરન્ધ્રે ભ્રુવોર્મધ્યે હૃન્નાભ્યુરુષુ પાદયોઃ ।
બીજૈઃ ષડ્દીર્ઘયુક્તૈર્વા મન્ત્રાર્ણૈર્વા ષડઙ્ગકમ્ ॥ ૨૩॥

કાલામ્ભોધરકાન્તિકાન્તમનિશં વીરાસનાધ્યાસિતં
મુદ્રાં જ્ઞાનમયીં દધાનમપરં હસ્તામ્બુજં જાનુનિ ।
સીતાં પાર્શ્વગતાં સરોરુહકરાં વિદ્યુન્નિભાં રાઘવં
પશ્યન્તં મુકુટાઙ્ગદાદિવિવિધાકલ્પોજ્જ્વલાઙ્ગં ભજે ॥ ૨૪॥

અષ્ટાવિંશત્યુત્તરશતધા ભિન્નષડક્ષરમુદ્ધરતિ-સ્વેતિ । શ્રીં શ્રીં યં નમઃ ઇતિ યઃ પઞ્ચાક્ષરો મનુરુક્તઃ સોઽયં પઞ્ચાક્ષરઃ રાં ક્લીં હ્રીં ઐં શ્રીં ૐ ઇતિ ષડ્બીજયોગતઃ ષડક્ષરઃ ષડ્વિધો ભવતિ । પ્રાતિસ્વિકેન પઞ્ચાશદ્વર્ણયોગતઃ પઞ્ચાશદ્વિધો ભવતિ । લક્ષ્મીવાગિત્યાદિબીજયોગતઃ સપ્તવિધો ભવતિ । રાં રામાયેતિ ચતુરક્ષરાણિ સ્વાહા હું ફટ્ નમઃ ઇત્યાદિયોગતઃ ષડક્ષરો ભવતિ । પુનશ્ચ ક્ષકારાદ્યકારાન્તવિલોમેન એકપઞ્ચાશત્ અષ્ટવર્ગશ્ચ ષટ્સ્વરાશ્ચ આહત્ય અષ્ટાવિંશત્યુત્તરશતભેદઃ ષડ્વર્ણ ઈરિતઃ ઇતિ । યદ્વા-

પઞ્ચાશદ્વર્ણકં વર્ગં ષોડશસ્વરસંયુતમ્ ।
વર્ગં વર્ણં વિલોમેન અષ્ટાવિંશચ્છતોત્તરમ્ ॥

ઇતિ ॥ ૧૬-૧૯॥ તદ્ભેદેન-બ્રહ્મેતિ ॥ ૨૦-૨૪॥

સપ્ત-અષ્ટ-નવાક્ષરમન્ત્રાઃ
રામશ્ચ ચન્દ્રભદ્રાન્તો ઙેન્તો નતિયુતો દ્વિધા ।
સપ્તાક્ષરો મન્ત્રરાજઃ સર્વકામફલપ્રદઃ ॥ ૨૫॥

તારાદિસહિતઃ સોઽપિ દ્વિવિધોઽષ્ટાક્ષરો મતઃ ।
તારં રામશ્ચતુર્થ્યન્તં ક્રોડાસ્ત્રં વહ્નિતલ્પગા ॥ ૨૬॥

અષ્ટાર્ણોઽયં પરો મન્ત્રો ઋષ્યાદિઃ સ્યાત્ ષડર્ણવત્ ।
પુનરષ્ટાક્ષરસ્યાથ રામ એવ ઋષિઃ સ્મૃતઃ ॥ ૨૭॥

ગાયત્રં છન્દ ઇત્યસ્ય દેવતા રામ એવ ચ ।
તારં શ્રીબીજયુગ્મૌ ચ બીજશક્ત્યાદયો મતાઃ ॥ ૨૮॥

ષડઙ્ગં ચ તતઃ કુર્યાન્મન્ત્રાર્ણૈરેવ બુદ્ધિમાન્ ।
તારં શ્રીબીજયુગ્મં ચ રામાય નમ ઉચ્ચરેત્ ॥ ૨૯॥

ગ્લૌમોં બીજં વદેન્માયાં હૃદ્રામાય પુનશ્ચ તામ્ ।
શિવોમારામમન્ત્રોઽયં વસ્વર્ણસ્તુ વસુપ્રદઃ ॥ ૩૦॥

ઋષિઃ સદાશિવઃ પ્રોક્તો ગાયત્રં છન્દ ઉચ્યતે ।
શિવોમારામચન્દ્રોઽત્ર દેવતા પરિકીર્તિતઃ ॥ ૩૧॥

દીર્ઘયા માયયાઽઙ્ગાનિ તારપઞ્ચાર્ણયુક્તયા ।
રામં ત્રિણેત્રં સોમાર્ધધારિણં શૂલિનં પરમ્ ।
ભસ્મોદ્ધૂળિતસર્વાઙ્ગં કપર્દિનમુપાસ્મહે ॥ ૩૨॥

રામાભિરામાં સૌન્દર્યસીમાં સોમાવતંસિકામ્ ।
પાશાઙ્કુશધનુર્બાણધરાં ધ્યાયેત્ત્રિલોચનામ્ ॥ ૩૩॥

ધ્યાયન્નેવં વર્ણલક્ષં જપતર્પણતત્પરઃ ।
બિલ્વપત્રૈઃ ફલૈઃ પુષ્પૈસ્તિલાજ્યૈઃ પઙ્કજૈર્હુનેત્ ॥ ૩૪॥

સ્વયમાયાન્તિ નિધયઃ સિદ્ધયશ્ચ સુરેપ્સિતાઃ ।
પુનરષ્ટાક્ષરસ્યાથ બ્રહ્મગાયત્રરાઘવાઃ ॥ ૩૫॥

ઋષ્યાદયસ્તુ વિજ્ઞેયાઃ શ્રીબીજં મમ શક્તિકમ્ ।
તત્પ્રીત્યૈ વિનિયોગશ્ચ મન્ત્રાર્ણૈરઙ્ગકલ્પના ॥ ૩૬॥

કેયૂરાઙ્ગદકઙ્કણૈર્મણિગણૈર્વિદ્યોતમાનં સદા

રામં પાર્વણચન્દ્રકોટિસદૃશચ્છત્રેણ વૈ રાજિતમ્ ।
હેમસ્તમ્ભસહસ્રષોડશયુતે મધ્યે મહામણ્ડપે
દેવેશં ભરતાદિભિઃ પરિવૃતં રામં ભજે શ્યામલમ્ ॥ ૩૭॥

કિં મન્ત્રૈર્બહુભિર્વિનશ્વરફલૈરાયાસસાધ્યૈર્વૃથા
કિઞ્ચિલ્લોભવિતાનમાત્રવિફલૈઃ સંસારદુઃખાવહૈઃ ।
એકઃ સન્નપિ સર્વમન્ત્રફલદો લોભાદિદોષોજ્ઝિતઃ
શ્રીરામઃ શરણં મમેતિ સતતં મન્ત્રોઽયમષ્ટાક્ષરઃ ॥ ૩૮॥

એવમષ્ટાક્ષરઃ સમ્યક્ સપ્તધા પરિકીર્તિતઃ ।
રામસપ્તાક્ષરો મન્ત્ર આદ્યન્તે તારસંયુતઃ ॥ ૩૯॥

નવાર્ણો મન્ત્રરાજઃ સ્યાચ્છેષં ષડ્વર્ણવન્ન્યસેત્ ॥

અથ દ્વેધા સપ્તાક્ષરમુદ્ધરતિ-રામ ઇતિ । રામચન્દ્રાય નમઃ રામભદ્રાય નમઃ ઇતિ દ્વિધા સપ્તાક્ષરો ભવતિ । ઋષ્યાદિકં પૂર્વવત્ ॥ ૨૫॥ અષ્ટાક્ષરમનું ષોડશધા ઉદ્ધરતિ-તારાદીતિ । "તારાદિ" ઇત્યાદિશબ્દતઃ માયારમાઽનઙ્ગવાક્સ્વબીજાનિ ગૃહ્યન્તે । તૈઃ યોગતઃ ચન્દ્રભદ્રભેદેન દ્વિપ્રકારો મનુઃ દ્વાદશધા ભિદ્યતે । ૐ રામચન્દ્રાય નમઃ ઇત્યાદિ ષટ્ । ૐ રામભદ્રાય નમઃ ઇત્યાદિ ષટ્ । આહત્ય દ્વાદશ । ઋષ્યાદિકં પૂર્વવત્ । પુનઃ મન્ત્રાન્તરમાહ-તારમિતિ ॥ ૨૬॥ ૐ રામાય હું ફટ્ સ્વાહા શ્રીરામાષ્ટાક્ષરાન્તરેણ ઉમામહેશ્વરબીજયોગતઃ શિવોમારામમનુર્ભવતીત્યાહ-પુનરિતિ । ૐ શ્રીં શ્રીં રામાય નમઃ, ગ્લૌં ૐ હ્રીં નમો રામાય ॥ ૨૭-૩૦॥ હ્રાં ૐ રામાય નમ ઇત્યાદિ ॥ ૩૧-૩૮॥ પ્રધાનતઃ સપ્તધા પરિકીર્તિતઃ । એકધા નવાર્ણમુદ્ધરતિ-રામેતિ । ૐ રામચન્દ્રાય નમઃ ૐ ઇતિ ॥ ૩૯॥

દશ-એકાદશાક્ષરમન્ત્રાઃ
જાનકીવલ્લભં ઙેન્તં વહ્નેર્જાયાહુમાદિકમ્ ॥ ૪૦॥

દશાક્ષરોઽયં મન્ત્રઃ સ્યાત્ સર્વાભીષ્ટફલપ્રદઃ ।
દશાક્ષરસ્ય મન્ત્રસ્ય વસિષ્ઠોઽસ્ય ઋષિર્વિરાટ્ ॥ ૪૧॥

છન્દોઽસ્ય દેવતા રામઃ સીતાપાણિપરિગ્રહઃ ।
આદ્યો બીજં દ્વિઠઃ શક્તિઃ કામેનાઙ્ગક્રિયા મતા ॥ ૪૨॥

શિરોલલાટભ્રૂમધ્યે તાલુકર્ણેષુ હૃદ્યપિ ।
નાભ્યૂરુજાનુપાદેષુ દશાર્ણાન્ વિન્યસેન્મનોઃ ॥ ૪૩॥

અયોધ્યાનગરે રત્નચિત્રે સૌવર્ણમણ્ડપે ।
મન્દારપુષ્પૈરાબદ્ધવિતાને તોરણાઞ્ચિતે ॥ ૪૪॥

સિંહાસને સમાસીનં પુષ્પકોપરિ રાઘવમ્ ।

રક્ષોભિર્હરિભિર્દેવૈર્દિવ્યયાનગતૈઃ શુભૈઃ ॥ ૪૫॥

સંસ્તૂયમાનં મુનિભિઃ પ્રહ્વૈશ્ચ પરિસેવિતમ્ ।
સીતાઽલઙ્કૃતવામાઙ્ગં લક્ષ્મણેનોપસેવિતમ્ ॥ ૪૬॥

શ્યામં પ્રસન્નવદનં સર્વાભરણભૂષિતમ્ ।
ધ્યાયન્નેવં જપેન્મન્ત્રં વર્ણલક્ષમનન્યધીઃ ॥ ૪૭॥

રામં ઙેન્તં ધનુષ્પાણયેઽન્તઃ સ્યાદ્વહ્નિસુન્દરી ।
દશાક્ષરોઽયં મન્ત્રઃ સ્યાન્મુનિર્બ્રહ્મા વિરાટ્ સ્મૃતઃ ॥ ૪૮॥

છન્દસ્તુ દેવતા પ્રોક્તો રામો રાક્ષસમર્દનઃ ।
શેષં તુ પૂર્વવત્ કુર્યાચ્ચાપબાણધરં સ્મરેત્ ॥ ૪૯॥

તારમાયારમાઽનઙ્ગવાક્સ્વબીજૈશ્ચ ષડ્વિધઃ ।
દશાર્ણો મન્ત્રરાજઃ સ્યાદ્દ્રુવર્ણાત્મકો મનુઃ ॥ ૫૦॥

શેષં ષડર્ણવજ્જ્ઞેયં ન્યાસધ્યાનાદિકં બુધૈઃ ।

દ્વિપ્રકારં દશાક્ષરમુદ્ધરતિ-જાનકીતિ । હું જાનકીવલ્લભાય સ્વાહેતિ ॥ ૪૦-૪૧॥ આદ્યો બીજં હુમિતિ । દ્વિઠઃ શક્તિઃ ઠઃ ઠઃ ઇતિ । કામેનાઙ્ગક્રિયા મતા ક્લીમિત્યાદિ ॥ ૪૨-૪૭॥ રામાય ધનુષ્પાણયે સ્વાહેતિ ॥ ૪૮-૪૯॥ એકાદશાક્ષરં ષોઢા ઉદ્ધરતિ-તારેતિ । ૐ રામાય ધનુષ્પાણયે સ્વાહા ઇત્યાદિ ॥ ૫૦॥

દ્વાદશાક્ષરમન્ત્રઃ

દ્વાદશાક્ષરમન્ત્રસ્ય શ્રીરામો ઋષિરુચ્યતે ॥ ૫૧॥

જગતી છન્દ ઇત્યુક્તં શ્રીરામો દેવતા મતઃ ।
પ્રણવો બીજમિત્યુક્તઃ ક્લીં શક્તિર્હ્રીં ચ કીલકમ્ ॥ ૫૨॥

મન્ત્રેણાઙ્ગાનિ વિન્યસ્ય શિષ્ટં પૂર્વવદાચરેત્ ।
તારં માયાં સમુચ્ચાર્ય ભરતાગ્રજ ઇત્યપિ ॥ ૫૩॥

રામક્લીંવહ્નિજાયાઽન્તં મન્ત્રોઽયં દ્વાદશાક્ષરઃ ।
ૐ હૃદ્ભગવતે રામચન્દ્રભદ્રૌ ચ ઙેયુતૌ ॥ ૫૪॥

અર્કાર્ણો દ્વિવિધોઽપ્યસ્ય ઋષિધ્યાનાદિ પૂર્વવત્ ।
છન્દસ્તુ જગતી ચૈવ મન્ત્રાર્ણૈરઙ્ગકલ્પના ॥ ૫૫॥

ૐ હ્રીં ભરતાગ્રજ રામ ક્લીં સ્વાહેતિ ॥ ૫૧-૫૩॥ ૐ નમો ભગવતે રામચન્દ્રાય, ૐ નમો ભગવતે રામભદ્રાય ઇતિ । ત્રિપ્રકારોઽયં દ્વાદશાક્ષરઃ ॥ ૫૪-૫૫॥

ત્રયોદશ-ચતુર્દશ-પઞ્ચદશાક્ષરમન્ત્રાઃ

શ્રીરામેતિ પદં ચોક્ત્વા જયરામ પદં તતઃ ।
જયદ્વયં વદેત્ પ્રાજ્ઞો રામેતિ મનુરાજકઃ ॥ ૫૬॥

ત્રયોદશાર્ણ ઋષ્યાદિ પૂર્વવત્ સર્વકામદઃ ।
પદદ્વયૈર્દ્વિરાવૃત્તૈરઙ્ગન્યાસં દશાર્ણવત્ ॥ ૫૭॥

તારાદિસહિતઃ સોઽપિ સ ચતુર્દશવર્ણકઃ ।
ત્રયોદશાર્ણમુચ્ચાર્ય પશ્ચાદ્રામેતિ યોજયેત્ ॥ ૫૮॥

સ વૈ પઞ્ચદશાર્ણસ્તુ જપતાં કલ્પભૂરુહઃ ॥

ત્રયોદશાર્ણમુદ્ધરતિ-શ્રીરામેતિ । શ્રીરામ જયરામ જય જય રામેતિ ॥ ૫૬-૫૭॥ સ ચતુર્દશવર્ણકઃ ષડ્વિધ ઇત્યર્થઃ । ષોડશાર્ણમુદ્ધરતિ-નમશ્ચેતિ । નમઃ સીતાપતયે રામાય હન હન હું ફટ્ સ્વાહા ઇતિ ॥ ૫૮-૬૧॥

ષોડશ-સપ્તદશાક્ષરમન્ત્રાઃ
નમશ્ચ સીતાપતયે રામાયેતિ હનદ્વયમ્ ॥ ૫૯॥

તતસ્તુ કવચાસ્ત્રાન્તઃ ષોડશાક્ષર ઈરિતઃ ।
તસ્યાગસ્ત્યઋષિશ્છન્દો બૃહતી દેવતા ચ સઃ ॥ ૬૦॥

રાં બીજં શક્તિરસ્ત્રં ચ કીલકં હુમિતીરિતમ્ ।
દ્વિપઞ્ચત્રિચતુર્વર્ણૈઃ સર્વૈરઙ્ગં ન્યસેત્ ક્રમાત્ ॥ ૬૧॥

તારાદિસહિતઃ સોઽપિ મન્ત્રઃ સપ્તદશાક્ષરઃ ।
સપ્તદશાક્ષરઃ ષડ્વિધઃ ॥ ૬૨॥

અષ્ટાદશ-એકોનવિંશાર્ણમન્ત્રાઃ
તારં નમો ભગવતે રામં ઙેન્તં મહા તતઃ ॥ ૬૨॥

પુરુષાય પદં પશ્ચાદ્ધૃદન્તોઽષ્ટાદશાક્ષરઃ ।
વિશ્વામિત્રો મુનિશ્છન્દો ગાયત્રં દેવતા ચ સઃ ॥ ૬૩॥

કામાદિસહિતઃ સોઽપિ મન્ત્ર એકોનવિંશકઃ ।
અષ્ટાદશાક્ષરઃ ૐ નમો ભગવતે રામાય મહાપુરુષાય નમઃ ॥ ૬૩॥ મન એકોનવિંશકઃ ષડ્વિધઃ ॥ ૬૪॥

વિંશાર્ણમન્ત્રઃ
તારં નમો ભગવતે રામાયેતિ પદં વદેત્ ॥ ૬૪॥

સર્વશબ્દં સમુચ્ચાર્ય સૌભાગ્યં દેહિ મે વદેત્ ।
વહ્નિજાયાં તતોચ્ચાર્ય મન્ત્રો વિંશાર્ણકો મતઃ ॥ ૬૫॥

ૐ નમો ભગવતે રામાય સર્વસૌભાગ્યં દેહિ મે સ્વાહા ॥ ૬૫॥

એકવિંશાર્ણમન્ત્રઃ

તારં નમો ભગવતે રામાય સકલં વદેત્ ।
આપન્નિવારણાયેતિ વહ્નિજાયાં તતો વદેત્ ॥ ૬૬॥

એકવિંશાર્ણકો મન્ત્રઃ સર્વાભીષ્ટફલપ્રદઃ ।

ૐ નમો ભગવતે રામાય સકલાપન્નિવારણાય સ્વાહા ॥ ૬૬॥

દ્વાવિંશાર્ણમન્ત્રઃ

તારં રમાં સ્વબીજં ચ તતો દાશરથાય ચ ॥ ૬૭॥

તતઃ સીતાવલ્લભાય સર્વાભીષ્ટપદં વદેત્ ।
તતો દાય હૃદન્તોઽયં મન્ત્રો દ્વાવિંશદક્ષરઃ ॥ ૬૮॥

ૐ શ્રીં રાં દાશરથાય સીતાવલ્લભાય સર્વાભીષ્ટદાય નમઃ ॥ ૬૭-૬૮॥

ત્રયોવિંશાર્ણમન્ત્રઃ

તારં નમો ભગવતે વીરરામાય સંવદેત્ ।
કલશત્રૂન્ હનદ્વન્દ્વં વહ્નિજાયાં તતો વદેત્ ॥ ૬૯॥

ત્રયોવિંશાક્ષરો મન્ત્રઃ સર્વશત્રુનિવર્હણઃ ।
વિશ્વામિત્રો મુનિઃ પ્રોક્તો ગાયત્રં છન્દ ઉચ્યતે ॥ ૭૦॥

દેવતા વીરરામોઽસૌ બીજાદ્યાઃ પૂર્વવન્મતાઃ ।
મૂલમન્ત્રવિભાગેન ન્યાસાન્ કૃત્વા વિચક્ષણઃ ॥ ૭૧॥

શરં ધનુષિ સન્ધાય તિષ્ઠન્તં રાવણોન્મુખમ્ ।
વજ્રપાણિરથારૂઢં રામં ધ્યાત્વા જપેન્મનુમ્ ॥ ૭૨॥

ૐ નમો ભગવતે વીરરામાય સકલશત્રૂન્ હન હન સ્વાહા ॥ ૬૯-૭૨॥

ચતુર્વિંશાર્ણમન્ત્રઃ

તારં નમો ભગવતે શ્રીરામાય પદં વદેત્ ।
તારકબ્રહ્મણે ચોક્ત્વા માં તારય પદં વદેત્ ॥ ૭૩॥

નમસ્તારાત્મકો મન્ત્રશ્ચતુર્વિંશતિવર્ણકઃ ।
બીજાદિકં યથાપૂર્વં સર્વં કુર્યાત્ ષડર્ણવત્ ॥ ૭૪॥

ૐ નમો ભગવતે શ્રીરામાય તારકબ્રહ્મણે માં તારય નમ ઓમિતિ ॥ ૭૩-૭૪॥

પઞ્ચવિંશ-ષડ્વિંશ-સપ્તવિંશાર્ણમન્ત્રાઃ
કામસ્તારો નતિશ્ચૈવ તતો ભગવતેપદમ્ ।
રામચન્દ્રાય ચોચ્ચાર્ય સકલેતિ પદં વદેત્ ॥ ૭૫॥

જનવશ્યકરાયેતિ સ્વાહા કામાત્મકો મનુઃ ।
સર્વવશ્યકરો મન્ત્રઃ પઞ્ચવિંશતિવર્ણકઃ ॥ ૭૬॥

આદૌ તારેણ સંયુક્તો મન્ત્રઃ ષડ્વિંશદક્ષરઃ ।
અન્તેઽપિ તારસંયુક્તઃ સપ્તવિંશતિવર્ણકઃ ॥ ૭૭॥

ક્લીં ૐ નમો ભગવતે રામચન્દ્રાય સકલજનવશ્યકરાય સ્વાહા ॥ ૭૫-૭૭॥

અષ્ટાવિંશ-એકોનત્રિંશ-ત્રિંશ-એકત્રિંશાર્ણમન્ત્રાઃ
તારં નમો ભગવતે રક્ષોઘ્નવિશદાય ચ ।
સર્વવિઘ્નાન્ સમુચ્ચાર્ય નિવારયપદદ્વયમ્ ॥ ૭૮॥

સ્વાહાઽન્તો મન્ત્રરાજોઽયમષ્ટાવિંશતિવર્ણકઃ ।
અન્તે તારેણ સંયુક્ત એકોનત્રિંશદક્ષરઃ ॥ ૭૯॥

આદૌ સ્વબીજસંયુક્તત્રિંશદ્વર્ણાત્મકો મનુઃ ।
અન્તેઽપિ તેન સંયુક્ત એકત્રિંશાત્મકઃ સ્મૃતઃ ॥ ૮૦॥

ૐ નમો ભગવતે રક્ષોઘ્નવિશદાય સર્વવિઘ્નાન્ નિવારય નિવારય સ્વાહા ॥ ૭૮- ૮૫॥

રામાનુષ્ટુપ્
રામભદ્ર મહેષ્વાસ રઘુવીર નૃપોત્તમ ।
ભો દશાસ્યાન્તકાસ્માકં શ્રિયં દાપય દેહિ મે ॥ ૮૧॥

આનુષ્ટુભ ઋષી રામશ્છન્દોઽનુષ્ટુપ્સ દેવતા ।
રાં બીજમસ્ય યં શક્તિરિષ્ટાર્થે વિનિયોજયેત્ ॥ ૮૨॥

પાદં હૃદિ ચ વિન્યસ્ય પાદં શિરસિ વિન્યસેત્ ।
શિખાયાં પઞ્ચભિર્ન્યસ્ય ત્રિવર્ણૈઃ કવચં ન્યસેત્ ॥ ૮૩॥

નેત્રયોઃ પઞ્ચવર્ણૈશ્ચ દાપયેત્યસ્ત્રમુચ્યતે ।
ચાપબાણધરં શ્યામં સસુગ્રીવવિભીષણમ્ ॥ ૮૪॥

હત્વા રાવણમાયાન્તં કૃતત્રૈલોક્યરક્ષણમ્ ।
રામભદ્રં હૃદિ ધ્યાત્વા દશલક્ષં જપેન્મનુમ્ ॥ ૮૫॥

રામગાયત્રી

વદેદ્દાશરથાયેતિ વિદ્મહેતિ પદં તતઃ ।
સીતાપદં સમુદ્ધૃત્ય વલ્લભાય તતો વદેત્ ॥ ૮૬॥

ધીમહીતિ વદેત્તન્નો રામશ્ચાપિ પ્રચોદયાત્ ।
તારાદિરેષા ગાયત્રી મુક્તિમેવ પ્રયચ્છતિ ॥ ૮૭॥

માયાऽऽદિરપિ વૈદુષ્યં રામાદિશ્ચ શ્રિયઃ પદમ્ ।
મદનેનાપિ સંયુક્તા સમ્મોહયતિ મેદિનીમ્ ॥ ૮૮॥

પઞ્ચ ત્રીણિ ષડર્ણૈશ્ચ ત્રીણિ ચત્વારિ વર્ણકૈઃ ।
ચત્વારિ ચ ચતુર્વર્ણૈરઙ્ગન્યાસં પ્રકલ્પયેત્ ॥ ૮૯॥

બીજધ્યાનાદિકં સર્વં કુર્યાત્ ષડ્વર્ણવત્ ક્રમાત્ ।
દાશરથાય વિદ્મહે સીતાવલ્લભાય ધીમહિ । તન્નો રામઃ પ્રચોદયાત્ ઇતિ રામગાયત્રી । પ્રણવાદિબીજયોજનફલમાહ-તારાદિરિતિ ॥ ૮૬-૮૯॥

રામમાલામન્ત્રઃ
તારં નમો ભગવતે ચતુર્થ્યા રઘુનન્દનમ્ ॥ ૯૦॥

રક્ષોઘ્નવિશદં તદ્વન્મધુરેતિ વદેત્તતઃ ।
પ્રસન્નવદનં ઙેન્તં વદેદમિતતેજસે ॥ ૯૧॥

બલરામૌ ચતુર્થ્યન્તૌ વિષ્ણું ઙેન્તં નતિસ્તતઃ ।
પ્રોક્તો માલામનુઃ સપ્તચત્વારિંશદ્ભિરક્ષરૈઃ ॥ ૯૨॥

ઋષિછન્દોદેવતાऽऽદિ બ્રહ્માનુષ્ટુભરાઘવાઃ ।
સપ્તર્તુસપ્તદશષડ્રુદ્રસઙ્ખ્યૈઃ ષડઙ્ગકમ્ ॥ ૯૩॥

ધ્યાનં દશાક્ષરં પ્રોક્તં લક્ષમેકં જપેન્મનુમ્ ।
માલામન્ત્રમુદ્ધરતિ-તારમિતિ । ૐ નમો ભગવતે રઘુનન્દનાય રક્ષોઘ્નવિશદાય મધુરપ્રસન્નવદનાય અમિતતેજસે બલાય શ્રીરામાય વિષ્ણવે નમ ઇતિ ॥ ૯૦-૯૩॥

સીતામન્ત્રઃ
શ્રિયં સીતા ચતુર્થ્યન્તા સ્વાહાન્તોऽયં ષડક્ષરઃ ॥ ૯૪॥

જનકોऽસ્ય ઋષિશ્છન્દો ગાયત્રી દેવતા મનોઃ ।
સીતા ભગવતી પ્રોક્તા શ્રીં બીજં નતિશક્તિકમ્ ॥ ૯૫॥

કીલં સીતા ચતુર્થ્યન્તમિષ્ટાર્થે વિનિયોજયેત્ ।
દીર્ઘસ્વરયુજાऽऽદ્યેન ષડઙ્ગાનિ પ્રકલ્પયેત્ ॥ ૯૬॥

સ્વર્ણાભામમ્બુજકરાં રામાલોકનતત્પરામ્ ।
ધ્યાયેત્ ષટ્કોણમધ્યસ્થરામાઙ્ગોપરિ સંસ્થિતામ્ ॥ ૯૭॥

સીતાદ્યઙ્ગમન્ત્રાનુદ્ધરતિ-શ્રિયમિતિ । શ્રીં સીતાયૈ સ્વાહેતિ ॥ ૯૪-૯૫॥ શ્રીમિત્યાદિ દીર્ઘસ્વરયુજા ॥ ૯૬-૯૭॥

લક્ષ્મણમન્ત્રઃ

લકારં તુ સમુદ્ધૃત્ય લક્ષ્મણાય નમોઽન્તકઃ ।
અગસ્ત્યઋષિરસ્યાથ ગાયત્રં છન્દ ઉચ્યતે ॥ ૯૮॥

લક્ષ્મણો દેવતા પ્રોક્તો લં બીજં શક્તિરસ્ય હિ ।
નમસ્તુ વિનિયોગો હિ પુરુષાર્થચતુષ્ટયે ॥ ૯૯॥

દીર્ઘભાજા સ્વબીજેન ષડઙ્ગાનિ પ્રકલ્પયેત્ ।
દ્વિભુજં સ્વર્ણરુચિરતનું પદ્મનિભેક્ષણમ્ ॥ ૧૦૦॥

ધનુર્બાણધરં વન્દે રામારાધનતત્પરમ્ ।
લં લક્ષ્મણાય નમ ઇતિ ॥ ૯૮-૧૦૦॥

ભરતમન્ત્રઃ

ભકારં તુ સમુદ્ધૃત્ય ભરતાય નમોઽન્તકઃ ॥ ૧૦૧॥

અગસ્ત્ય ઋષિરસ્યાથ શેષં પૂર્વવદાચરેત્ ।
ભરતં શ્યામલં શાન્તં રામસેવાપરાયણમ્ ॥ ૧૦૨॥

ધનુર્બાણધરં વીરં કૈકેયીતનયં ભજે ।
ભં ભરતાય નમઃ ॥ ૧૦૧-૧૦૨॥

શત્રુઘ્નમન્ત્રઃ

શં બીજં તુ સમુદ્ધૃત્ય શત્રુઘ્નાય નમોઽન્તકઃ ।
ઋષ્યાદયો યથાપૂર્વં વિનિયોગોઽરિનિગ્રહે ॥ ૧૦૩॥

દ્વિભુજં સ્વર્ણવર્ણાભં રામસેવાપરાયણમ્ ।
લવણાસુરહન્તારં સુમિત્રાતનયં ભજે ॥ ૧૦૪॥

શં શત્રુઘ્નાય નમઃ ॥ ૧૦૩-૧૦૪॥

હનૂમન્મન્ત્રઃ

હં હનૂમાંશ્ચતુર્થ્યન્તં હૃદન્તો મન્ત્રરાજકઃ ।
રામચન્દ્ર ઋષિઃ પ્રોક્તો યોજયેત્ પૂર્વવત્ ક્રમાત્ ॥ ૧૦૫॥

દ્વિભુજં સ્વર્ણવર્ણાભં રામસેવાપરાયણમ્ ।
મૌઞ્જીકૌપીનસહિતં માં ધ્યાયેદ્રામસેવકમ્ ॥ ઇતિ ॥ ૧૦૬॥

હં હનૂમતે નમઃ ॥ ૧૦૫-૧૦૬॥

ઇતિ દ્વિતીયોઽધ્યાયઃ ।

## તૃતીયોઽધ્યાયઃ

પૂજાપીઠજિજ્ઞાસા

સનકાદ્યા મુનયો હનૂમન્તં પપ્રચ્છુઃ-આઞ્જનેય મહાબલ પૂર્વોક્તમન્ત્રાણાં પૂજાપીઠમનુબ્રૂહીતિ ॥ ૧॥

એકાક્ષરાદિદ્વાત્રિંશદક્ષરમન્ત્રાણાં પૂજાપીઠપ્રકારં પૃચ્છન્તીત્યાહ-સનકાદ્યા ઇતિ । પપ્રચ્છુઃ-કિમિતિ? આઞ્જનેયેતિ ॥ ૧॥

એકાક્ષરાદિનવાક્ષરાન્તમન્ત્રપૂજાયન્ત્રં

હનૂમાન્ હોવાચ-આદૌ ષટ્કોણમ્ । તન્મધ્યે રામબીજં સશ્રીકમ્ । તદધોભાગે દ્વિતીયાન્તં સાધ્યમ્ । બીજોર્ધ્વભાગે ષષ્ઠ્યન્તં સાધકમ્ । પાર્શ્વે દૃષ્ટિબીજે । તત્પરિતો જીવપ્રાણશક્તિવશ્યબીજાનિ । તત્સર્વં સમ્મુખોન્મુખાભ્યાં પ્રણવાભ્યાં વેષ્ટનમ્ । અગ્નીશાસુરવાયવ્યપુરઃપૃષ્ઠેષુ ષટ્કોણેષુ દીર્ઘભાજિ હૃદયાદિમન્ત્રાઃ ક્રમેણ । રાં રીં રૂં રૈં રૌં રઃ ઇતિ દીર્ઘભાજિ તદ્યુક્તહૃદયાદ્યસ્ત્રાન્તમ્ । ષટ્કોણપાર્શ્વે રમામાયાબીજે । કોણાગ્રે વરાહં હુમિતિ । તદ્બીજાન્તરાલે કામબીજમ્ । પરિતો વાગ્ભવમ્ । તતો વૃત્તત્રયં સાષ્ટપત્રમ્ । તેષુ દલેષુ સ્વરાન્ ષડ્વર્ગાન્ । પ્રતિદલં માલામનુવર્ણષટ્કમ્ । અન્તે પઞ્ચાક્ષરમ્ । તદ્દલકપોલેષ્વષ્ટવર્ગાન્ । પુનરષ્ટદલપદ્મમ્ । તેષુ દલેષુ નારાયણાષ્ટાક્ષરીમન્ત્રઃ । તદ્દલકપોલેષુ શ્રીબીજમ્ । તતો વૃત્તમ્ । તતો દ્વાદશદલમ્ । તેષુ દલેષુ વાસુદેવદ્વાદશાક્ષરીમન્ત્રઃ । તદ્દલકપોલેષ્વાદિક્ષાન્તાન્ । તતો વૃત્તમ્ । તતઃ ષોડશદલમ્ । તેષુ દલેષુ હું ફટ્ નતિસહિતરામદ્વાદશાક્ષરમ્ । તદ્દલકપોલેષુ માયાબીજમ્ । સર્વત્ર પ્રતિકપોલં દ્વિરાવૃત્ત્યા હ્રૂં સ્ત્રં ભ્રં વ્રં જં અં શ્રં જમ્ । તતો વૃત્તમ્ । તતો દ્વાત્રિંશદ્દલપદ્મમ્ । તેષુ દલેષુ નૃસિંહમન્ત્રરાજાનુષ્ટુભમન્ત્રઃ । તદ્દલકપોલેષ્વષ્ટવસ્વેકાદશરુદ્રદ્વાદશાદિત્યમન્ત્રાઃ પ્રણવાદિનમોઽન્તાશ્ચતુર્થ્યન્તાઃ ક્રમેણ । તદ્બહિર્વષટ્કારં પરિતઃ । તતો રેખાત્રયયુક્તં ભૂપુરમ્ । દ્વાદશદિક્ષુ રાશ્યાદિભૂષિતમ્ । અષ્ટનાગૈરધિષ્ઠિતમ્ । ચતુર્દિક્ષુ નારસિંહબીજમ્ । વિદિક્ષુ વારાહબીજમ્ । એતત્ સર્વાત્મકં યન્ત્રં સર્વકામપ્રદં મોક્ષપ્રદં ચ । એકાક્ષરાદિનવાક્ષરાન્તાનામેતદ્યન્ત્રં ભવતિ ॥ ૨॥

એકાક્ષરાદિનવાક્ષરાન્તાનાં મન્ત્રાણાં પૂજાપીઠપ્રકારમાદૌ કથયતિ-આદાવિતિ । આદૌ ષટ્કોણં વિલિખ્યેતિ સર્વત્રોહ્યમ્ । સશ્રીકં શ્રીગર્ભિતમિત્યર્થઃ । દ્વિતીયાન્તં સાધ્યં સર્વાભીષ્ટસિદ્ધિદમિતિ । ષષ્ઠ્યન્તં સાધકં મમેતિ । પાર્શ્વે કુરુદ્વયલેખનપૂર્વકં દૃષ્ટિબીજે ઇં ઈં ઇતિ । જીવપ્રાણશક્તિવશ્યબીજાનિ-હંસ ઇતિ જીવબીજં, સોઽહમિતિ પ્રાણબીજં, હ્રીમિતિ શક્તિબીજં, ક્લીમિતિ વશ્યબીજમ્ । હૃદયાદ્યસ્ત્રાન્તં રાં નમ ઇત્યાદિ રઃ અસ્ત્રાય ફટ્ ઇત્યન્તમ્

। ષટ્કોણપાર્શ્વે રમામાયાબીજે શ્રીં હ્રીમિતિ । કામબીજં ક્લીમિતિ । વાગ્ભવં ઐમિતિ । અન્તે પઞ્ચાક્ષરં-સપ્તદળેષુ દ્વિચત્વારિંશદ્વર્ણાન્ વિલિખ્ય શિષ્ટાષ્ટમદળે શિષ્ટપઞ્ચાક્ષરં વિલિખેદિત્યર્થઃ । મેષાદિરાશ્યાદિના રાશ્યાદિવિભૂષિતમ્ । નારસિંહબીજં ક્ષ્ર્યૌમિતિ ॥ ૨॥

આવરણપૂજાપૂર્વકમનુજપઃ

તદ્દશાવરણાત્મકં ભવતિ । ષટ્કોણમધ્યે સાઙ્ગં રાઘવં યજેત્ । ષટ્કોણેષ્વઙ્ગૈઃ પ્રથમાવૃતિઃ । અષ્ટદલમૂલે આત્માદ્યાવરણમ્ । તદગ્રે વાસુદેવાદ્યાવરણમ્ । દ્વિતીયાષ્ટદલમૂલે ધૃષ્ટ્યાદ્યાવરણમ્ । તદગ્રે હનૂમદાદ્યાવરણમ્ । દ્વાદશદલેષુ વસિષ્ઠાદ્યાવરણમ્ । ષોડશદલેષુ નીલાદ્યાવરણમ્ । દ્વાત્રિંશદ્લેષુ ધ્રુવાદ્યાવરણમ્ । ભૂપુરાન્તરિન્દ્રાદ્યાવરણમ્ । તદ્બહિર્વજ્રાદ્યાવરણમ્ । એવમભ્યર્ચ્ય મનું જપેત્ ॥ ૩॥

ષટ્કોણેષુ હૃદયાદ્યઙ્ગૈઃ પ્રથમાવૃતિઃ ॥ ૩॥

દશાક્ષરાદિદ્વાત્રિંશાક્ષરાન્તમન્ત્રપૂજાયન્ત્રં

અથ દશાક્ષરાદિદ્વાત્રિંશદક્ષરાન્તાનાં મન્ત્રાણાં પૂજાપીઠમુચ્યતે-આદૌ ષટ્કોણમ્ । તન્મધ્યે સ્વબીજમ્ । તન્મધ્યે સાધ્યનામાનિ । એવં કામબીજવેષ્ટનમ્ । તં શિષ્ટેન નવાર્ણેન વેષ્ટનમ્ । ષટ્કોણેષુ ષડઙ્ગાન્યગ્નીશાસુરવાયવ્યપૂર્વપૃષ્ઠેષુ । તત્કપોલેષુ શ્રીમાયે । કોણાગ્રે ક્રોધમ્ । તતો વૃત્તમ્ । તતોઽષ્ટદલમ્ । તેષુ દલેષુ ષટ્સઙ્ખ્યયા માલામનુવર્ણાન્ । તદ્દલકપોલેષુ ષોડશ સ્વરાઃ । તતો વૃત્તમ્ । તત્પરિત આદિક્ષાન્તમ્ । તદ્બહિર્ભૂપુરં સાષ્ટશૂલાગ્રમ્ । દિક્ષુ વિદિક્ષુ નારસિંહવારાહે । એતન્મહાયન્ત્રમ્ । આધારશક્ત્યાદિવૈષ્ણવપીઠમ્ ॥ ૪॥

આદૌ ષટ્કોણં લિખિત્વેતિ સર્વત્ર સમાનમ્ । મધ્યે સ્વબીજં હુ[રા]મિતિ(?)। મધ્યે સાધ્યનામાનિ મમ સર્વાભીષ્ટસિદ્ધિં કુરુકુરુ નમ ઇતિ એતત્ સર્વમ્ । ક્રોધં હુમિતિ । નારસિંહવારાહે ક્ષ્ર્યૌં હુમિતિ ॥ ૪॥

યન્ત્રારાધનપૂર્વકમનુજપઃ

અઙ્ગૈઃ પ્રથમાવૃતિઃ । મધ્યે રામમ્ । વામભાગે સીતામ્ । તત્પુરતઃ શાર્ઙ્ગ શરં ચ । અષ્ટદલમૂલે હનૂમદાદિ દ્વિતીયાવરણમ્ । ધૃષ્ટ્યાદિ તૃતીયાવરણમ્ । ઇન્દ્રાદિભિશ્ચતુર્થી । વજ્રાદિભિઃ પઞ્ચમી । એતદ્યન્ત્રારાધનપૂર્વકં દશાક્ષરાદિમનૂન્ જપેત્ ॥ ૫॥

હૃદયાદિ-અઙ્ગૈઃ । દ્વિતીયાવરણં-તદગ્રે ધૃષ્ટ્યાદિતૃતીયાવરણમ્ ॥ ૫॥

ઇતિ તૃતીયોઽધ્યાયઃ ॥ ।

## ચતુર્થોઽધ્યાયઃ

શ્રીરામમન્ત્રપુરશ્ચરણવિધિઃ

સનકાદ્યા મુનયો હનૂમન્તં પપ્રચ્છુઃ-શ્રીરામમન્ત્રાણાં પુરશ્ચરણવિધિમનુબ્રૂહીતિ । હનૂમાન્ હોવાચ-
નિત્યં ત્રિષવણસ્નાયી પયોમૂલફલાદિભુક્ ।

અથવા પાયસાહારો હવિષ્યાન્નાદ એવ ચ ॥ ૧॥

ષડ્રસૈશ્ચ પરિત્યક્તઃ સ્વાશ્રમોક્તવિધિં ચરન્ ।
વનિતાઽઽદિષુ વાક્કર્મમનોભિર્નિઃસ્પૃહઃ શુચિઃ ॥ ૨॥

ભૂમિશાયી બ્રહ્મચારી નિષ્કામો ગુરુભક્તિમાન્ ।
સ્નાનપૂજાજપધ્યાનહોમતર્પણતત્પરઃ ॥ ૩॥

ગુરૂપદિષ્ટમાર્ગેણ ધ્યાયન્ રામમનન્યધીઃ ।
સૂર્યેન્દુગુરુદીપાદિગોબ્રાહ્મણસમીપતઃ ॥ ૪॥

શ્રીરામસન્નિધૌ મૌની મન્ત્રાર્થમનુચિન્તયન્ ।
વ્યાઘ્રચર્માસને સ્થિત્વા સ્વસ્તિકાદ્યાસનક્રમાત્ ॥ ૫॥

તુલસીપારિજાતશ્રીવૃક્ષમૂલાદિકસ્થલે ।
પદ્માક્ષતુલસીકાષ્ઠરુદ્રાક્ષકૃતમાલયા ॥ ૬॥

માતૃકામાલયા મન્ત્રી મનસૈવ મનું જપન્ ।
અભ્યર્ચ્ય વૈષ્ણવે પીઠે જપેદક્ષરલક્ષકમ્ ॥ ૭॥

તર્પયેત્તદ્દશાંશેન પયસા તદ્દશાંશતઃ ।
જુહુયાદ્ગોઘૃતેનૈવ ભોજયેત્તદ્દશાંશતઃ ॥ ૮॥

તતઃ પુષ્પાઞ્જલિં મૂલમન્ત્રેણ વિધિવચ્ચરેત્ ।
તતઃ સિદ્ધમનુર્ભૂત્વા જીવન્મુક્તો ભવેન્મુનિઃ ॥ ૯॥

એકાક્ષરાદિમન્ત્રાણાં પુરશ્ચરણાનિયમબુભુત્સયા પૃચ્છન્તીત્યાહ-સનકાદ્યા ઇતિ । પપ્રચ્છુઃ-કિં તત્? શ્રીરામમન્ત્રાણામિતિ । પુરશ્ચરણનિયમઃ કીદૃશઃ ઇત્યત્ર-નિત્યમિતિ ॥ ૧-૧૩॥

ઐહિકે રામમન્ત્રવિનિયોગનિષેધઃ
અણિમાદિર્ભજત્યેનં યૂનં વરવધૂરિવ ।
ઐહિકેષુ ચ કાર્યેષુ મહાપત્સુ ચ સર્વદા ॥ ૧૦॥

નૈવ યોજ્યો રામમન્ત્રઃ કેવલં મોક્ષસાધકઃ ।
ઐહિકે હનૂમત્સ્મરણવિધિઃ
ઐહિકે સમનુપ્રાપ્તે માં સ્મરેદ્રામસેવકમ્ ॥ ૧૧॥

યો રામં સંસ્મરેન્નિત્યં ભક્ત્યા મનુપરાયણઃ ।
તસ્યાહમિષ્ટસંસિદ્ધ્યૈ દીક્ષિતોઽસ્મિ મુનીશ્વરાઃ ॥ ૧૨॥

વાઞ્છિતાર્થં પ્રદાસ્યામિ ભક્તાનાં રાઘવસ્ય તુ ।

સર્વથા જાગરૂકોઽસ્મિ રામકાર્યધુરન્ધરઃ ॥ ૧૩॥

ઇતિ ચતુર્થોઽધ્યાયઃ ।

## પઞ્ચમોઽધ્યાયઃ

રામષડક્ષરસ્ય મન્ત્રરાજત્વં

સનકાદ્યા મુનયો હનૂમન્તં પપ્રચ્છુઃ-શ્રીરામમન્ત્રાર્થમનુબ્રૂહીતિ ॥ હનૂમાન્ હોવાચ-
સર્વેષુ રામમન્ત્રેષુ મન્ત્રરાજઃ ષડક્ષરઃ ।
એકા દ્વિવિધા ત્રેધા ચતુર્ધા પઞ્ચધા તથા ॥ ૧॥

ષટ્સપ્તધાઽષ્ટધા ચૈવ બહુધાઽયં વ્યવસ્થિતઃ ।
ષડક્ષરસ્ય માહાત્મ્યં શિવો જાનાતિ તત્ત્વતઃ ॥ ૨॥

શ્રીરામમન્ત્રરાજસ્ય સમ્યગર્થોઽયમુચ્યતે ।
નારાયણાષ્ટાક્ષરે ચ શિવપઞ્ચાક્ષરે તથા ॥ ૩॥

સાર્થકાર્ણદ્વયં રામો રમન્તે યત્ર યોગિનઃ ॥

મન્ત્રાર્થબુભુત્સયા મુનયઃ પૃચ્છન્તીત્યાહ-સનકાદ્યા ઇતિ । પપ્રચ્છુઃ-કિં તત્? શ્રીરામેતિ । તત્પ્રશ્નોત્તરં હનૂમાન્ હોવાચ । કિમિત્યત્ર-બહૂનાં રામમન્ત્રાણાં મધ્યે ષડક્ષરસ્ય મન્ત્રરાજત્વં તારકત્વાત્, તારાદિબહુબીજયોગતો બહુત્વં ચિન્માત્રગોચરત્વં ચાહ-સર્વેષ્વિતિ ॥ ૧॥ પઞ્ચાશદ્વર્ણતદ્વિકૃતિયોગતો બહુત્વં તદર્થરૂપેણ બ્રહ્મમાત્રતા ચોપપદ્યતે ઇતિ ॥ ૨-૩॥

રામબીજાર્થઃ
રકારો વહ્નિવચનઃ પ્રકાશઃ પર્યવસ્યતિ ॥ ૪॥

સચ્ચિદાનન્દરૂપોઽસ્ય પરમાત્માર્થ ઉચ્યતે ।
વ્યઞ્જનં નિષ્કલં બ્રહ્મ પ્રાણો માયેતિ ચ સ્વરઃ ॥ ૫॥

વ્યઞ્જનૈઃ સ્વરસંયોગં વિદ્ધિ તત્પ્રાણયોજનમ્ ।
રેફે જ્યોતિર્મયે તસ્માત્ કૃતમાકારયોજનમ્ ॥ ૬॥

મકારોઽભ્યુદયાર્થત્વાત્ સ માયેતિ ચ કીર્ત્યતે ।
સોઽયં બીજં સ્વકં યસ્માત્ સમાયં બ્રહ્મ ચોચ્યતે ॥ ૭॥

સબિન્દુઃ સોઽપિ પુરુષઃ શિવસૂર્યેન્દુરૂપવાન્ ।
જ્યોતિસ્તસ્ય શિખારૂપં નાદઃ સપ્રકૃતિર્મતઃ ॥ ૮॥

પ્રકૃતિઃ પુરુષશ્ચોભૌ સમાયાદ્બ્રહ્મણઃ સ્મૃતૌ ।

બિન્દુનાદાત્મકં બીજં વહ્નિસોમકલાઽઽત્મકમ્ ॥ ૯॥

અગ્નીષોમાત્મકં રૂપં રામબીજે પ્રતિષ્ઠિતમ્ ।
યથૈવ વટબીજસ્થઃ પ્રાકૃતશ્ચ મહાન્ દ્રુમઃ ॥ ૧૦॥

તથૈવ રામબીજસ્થં જગદેતચ્ચરાચરમ્ ।
બીજોક્તમુભયાર્થત્વં રામનામનિ દૃશ્યતે ॥ ૧૧॥

બીજં માયાવિનિર્મુક્તં પરં બ્રહ્મેતિ કીર્ત્યતે ।

તત્રાદૌ સ્વબીજાર્થમાહ-રકાર ઇતિ । રેતિ વ્યઞ્જનં વહ્નિવચનં, વહ્નિગતહેયાંશાપાયે વહ્નેઃ ચિદ્વહ્નિત્વેન પ્રકાશમાત્રં પર્યવસ્યતિ ॥ ૪॥ અસ્યાર્થસ્તુ સચ્ચિદાનન્દમાત્રઃ પરમાત્મેત્યર્થઃ । વ્યઞ્જનસ્ય નિર્વિશેષત્વં તત્ર સ્વરવિશેષયોગતઃ સવિશેષત્વં ચાહ-વ્યઞ્જનમિતિ ॥ ૫॥ એતેન કિં કૃતં સ્યાદિત્યત આહ-રેફ ઇતિ ॥ ૬॥ તત્ર બિન્દુયોજનં અભ્યુદયાર્થમિત્યાહ-મકાર ઇતિ । સમાયશબ્દાર્થમાહ-સોઽયમિતિ ॥ ૭॥ બિન્દુનાદયોગતો જગત્કારણતામેતીયાહ-સબિન્દુરિતિ । યો બિન્દુના મનસા સહ વર્તત ઇતિ સબિન્દુઃ સોઽપિ પુરુષો જીવઃ સમષ્ટિબિન્દ્વધિકરણશિવસૂર્યેન્દુરૂપવાન્ ભવતિ । પ્રકૃતિસ્વરૂપં તુ તસ્ય પુરુષસ્ય જ્યોતિઃ પ્રકાશ એવ શિખાસ્વરૂપં “તુરીયં મૂર્ધ્નિ સંસ્થિતં” ઇતિ શ્રુતેઃ । મૂલાદિપ્રકૃત્યા સહ વર્તત ઇતિ સપ્રકૃતિઃ નાદોપાધિકઃ પુરુષો મતઃ ॥ ૮॥ એવં પ્રકૃતિપુરુષૌ સમાયાત્ સવિશેષાત્ બ્રહ્મણઃ સકાશાદ્વિકલ્પિતૌ ઇતિ સ્મૃતૌ ॥ ૯॥ એવં પ્રકૃતિપુરુષકલનાકલિતં વિશ્વં રામબીજે પ્રતિષ્ઠિતં ઇત્યત્ર દૃષ્ટાન્તઃ વટબીજાન્તર્ગતવટવૃક્ષવત્ રામબીજસ્થં જગદિત્યર્થઃ ॥ ૧૦॥ ઉપાધિયોગતઃ સવિશેષત્વં વસ્તુતો નિર્વિશેષત્વં ચ સ્યાદિત્યત આહ-બીજોક્તમિતિ ॥ ૧૧॥

દ્વ્યક્ષરાર્થઃ
મુક્તિદં સાધકાનાં ચ મકારો મુક્તિદો મતઃ ॥ ૧૨॥

મારૂપત્વાદતો રામો ભુક્તિમુક્તિફલપ્રદઃ ।
આદ્યો રા તત્પદાર્થઃ સ્યાન્મકારસ્ત્વમ્પદાર્થવાન્ ॥ ૧૩॥

તયોઃ સંયોજનમસીત્યર્થે તત્ત્વવિદો વિદુઃ ।

એકાક્ષરમન્ત્રાર્થમુક્ત્વા દ્વ્યક્ષરાર્થમાહ-મુક્તિદમિતિ ॥ ૧૨॥ રેફમકારયોઃ કામાકામધિયાં ભુક્તિમુક્તિપ્રદત્વં યુજ્યતે ઇત્યર્થઃ । રામનામ્નો મુક્તિહેતુત્વં કથમિત્યત્ર પ્રત્યગભિન્નબ્રહ્મવાચકત્વાત્ તત્ યુજ્યત ઇત્યાહ-આદ્ય ઇતિ ॥ ૧૩॥ રામાક્ષરાખ્યતત્ત્વમ્પદગતવાચ્યાર્થકલનાઽપવાદાધિકરણપ્રત્યગભિન્નબ્રહ્મણઃ સ્વાજ્ઞાદિદૃષ્ટિપ્રસક્તપ્રત્યક્પરવિભાગૈક્યકલનાઽસમ્ભવસમ્યજ્જ્ઞાનતો નિષ્પ્રતિયોગિકબ્રહ્મમાત્રતયા લક્ષિતત્વાત્ રામપદાર્થો બ્રહ્મૈવેત્યર્થઃ, “રામઃ સત્યં પરં બ્રહ્મ રામાત્ કિઞ્ચિન્ન વિદ્યતે” ઇતિ સ્મૃતેઃ ॥

ષડક્ષરાર્થઃ
નમસ્ત્વમર્થો વિજ્ઞેયો રામસ્તત્પદમુચ્યતે ॥ ૧૪॥

અસીત્યર્થે ચતુર્થી સ્યાદેવં મન્ત્રેષુ યોજયેત્ ।

ષડક્ષરાર્થપ્રકટનવ્યાજેન ત્ર્યક્ષરાદિસર્વમન્ત્રાર્થમાહ-નમ ઇતિ ॥ ૧૪॥ ત્ર્યક્ષરાદિમન્ત્રજાતં ત્રેધા વિભજ્ય "તત્ત્વમસિ" ઇતિ મહાવાક્યાર્થયોજનં કર્તવ્યમિત્યર્થઃ ॥

રામમન્ત્રમાહાત્મ્યં

તત્ત્વમસ્યાદિવાક્યં તુ કેવલં મુક્તિદં યતઃ ॥ ૧૫॥

ભુક્તિમુક્તિપ્રદં ચૈતત્તસ્માદપ્યતિરિચ્યતે ।
મનુષ્વેતેષુ સર્વેષામધિકારોઽસ્તિ દેહિનામ્ ॥ ૧૬॥

મુમુક્ષૂણાં વિરક્તાનાં તથા ચાશ્રમવાસિનામ્ ।
પ્રણવત્વાત્ સદા ધ્યેયો યતીનાં ચ વિશેષતઃ ॥

રામમન્ત્રાર્થવિજ્ઞાની જીવન્મુક્તો ન સંશયઃ ॥ ૧૭॥

"તત્ત્વમસિ" ઇત્યાદિમહાવાક્યાપેક્ષયા અસ્ય સર્વોત્કૃષ્ટત્વમાહ-તદિતિ ॥ ૧૫॥ પ્રાણિમાત્રસ્ય સપ્તકોટિમહામન્ત્ર(ત્વા)ધિકૃતત્વેઽપિ યતિભિરસેવિતત્વાત્ રામમન્ત્રસ્ય તુ પ્રણવસ્વરૂપત્વેન તૈરપિ ગ્રાહ્યમિત્યાહ-મનુષ્વિતિ ॥ ૧૬॥ મન્ત્રાર્થજ્ઞાનફલમાહ-રામમન્ત્રાર્થેતિ ॥ ૧૭॥

વિદ્યાઽધ્યયનફલં

ય ઇમામુપનિષદમધીતે સોઽગ્નિપૂતો ભવતિ । સ વાયુપૂતો ભવતિ । સુરાપાનાત્ પૂતો ભવતિ । સ્વર્ણસ્તેયાત્ પૂતો ભવતિ । બ્રહ્મહત્યાત્ પૂતો ભવતિ । સ રામમન્ત્રાણાં કૃતપુરશ્ચરણો રામચન્દ્રો ભવતિ ॥ ૧૮॥

તદેતદૃચાઽભ્યુક્તમ્-
સદા રામોઽહમસ્મીતિ તત્ત્વતઃ પ્રવદન્તિ યે ।
ન તે સંસારિણો નૂનં રામ એવ ન સંશયઃ ॥

ॐ સત્યમિત્યુપનિષત્ ॥ ૧૯॥

ઉપનિષત્પારાયણફલમાહ-ય ઇતિ ॥ ૧૮॥ યદુક્તં તદેતદૃચા મન્ત્રેણાપ્યુક્તં ભવતીત્યાહ-તદેતદૃચાઽભ્યુક્તમિતિ । પ્રથમાધ્યાયાદૌ "રામ એવ પરં બ્રહ્મં" ઇતિ મન્ત્રેણ યઃ પરમાત્મા નિષ્પ્રતિયોગિકસ્વમાત્રતયા અવશિષ્યતે તત્ત્વતઃ સોઽયં રામોઽહમસ્મીતિ યે સદા અનુભૂય યથોક્તાધિકારિભ્યઃ પ્રવદન્તિ તે રામ એવ ભવન્તીત્યત્ર ન હિ સંશયોઽસ્તિ । ॐ સત્યમિત્યત્ર "શ્રીરામો બ્રહ્મ તારકં" ઇત્યુક્તત્વાત્ । ઇત્યુપનિષચ્છબ્દો રામરહસ્યોપનિષત્સમાપ્ત્યર્થઃ ॥ ૧૯॥

ઇતિ પઞ્ચમોઽધ્યાયઃ ।

શ્રીવાસુદેવેન્દ્રશિષ્યોપનિષદ્બ્રહ્મયોગિના ।
રામરહસ્યોપનિષદ્વ્યાખ્યાનં લિખિતં સ્ફુટમ્ ॥

રામરહસ્યોપનિષદ્વ્યાખ્યાનગ્રન્થવિસ્તરઃ ।

અષ્ટાશીત્યધિકેનાઢ્યદ્વિશતં પરિકીર્તિતઃ ॥

ઇતિ શ્રીમદીશાદ્યષ્ટોત્તરશતોપનિષચ્છાસ્ત્રવિવરણે ચતુષ્પઞ્ચાશત્સઙ્ખ્યાપૂરકં

શ્રીરામરહસ્યોપનિષદ્વિવરણં સમ્પૂર્ણમ્ ।

ૐ ભદ્રં કર્ણેભિઃ શ્રુણુયામ દેવાઃ । ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાંસસ્તનૂભિર્વ્યશેમ દેવહિતં યદાયુઃ ।
સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ । સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ । સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

Encoded and proofread by Mrityunjay Pandey

*Ramarahasyopanishat Savyakhya*
pdf was typeset on October 30, 2025

Please send corrections to *sanskrit@cheerful.com*